# गीतानि

## सरस्वती-वन्दना

जय-जय विद्यादेवि ! सरस्वति !
तव चरणौ प्रणमामः ।
तव चरणौ प्रणमामो मातः
तव चरणौ प्रणमामः ।। जय जय विद्यादेवि सरस्वति !

श्वेतकमलमासनमतिरम्यं,
हंस स्तव शुभयानम् ।
वीणा-वादनमतिप्रियमधुरम्,
पुस्तकधारिणि मातः ।। जय जय विद्यादेवि सरस्वति !

ब्रह्मानन्द-विहारिणि जननि !
जडमति-हारिणि मातः ।
विमल-वसन-परिधारिणि धन्ये,
बुद्धि-प्रकाशिनि मातः ।। जय जय विद्यादेवि सरस्वति !

उपकारं मम कल्याणं कुरु,
सुमतिं देहि प्रकामम् ।
नाना-विघ्नदलं हर अम्ब !
निर्विघ्नं कुरु कामम् ।। जय जय विद्यादेवि सरस्वति !

(इदं वन्दना-गीतं ''जय जय भैरवि असुरभयावनि'' इति गीतलयानुसारं सामान्यलोकगीतानुसारं वा गीयते)

NOT TO BE PUBLISHED ©BSTBPC

# सरला संस्कृत-भाषा

सरला संस्कृत-भाषा,
सरसा संस्कृत-भाषा।
प्रियकरी च बुद्धिकरी
मधुरा संस्कृत-भाषा ।। 1 ।।

शृणु नीतियुतं पद्यं
शृणु भक्तियुतं स्तोत्रम् ।
शृणु भावयुतं श्लोकं
शृणु मनोहारि गीतम् ।। 2 ।।

नहि शब्दरूपरटनम्
नहि धातुरूपरटनम् ।
प्रिय सावधानमनसा
गुरुवाक्यदिशा चलनम् ।। 3 ।।

कुरु अभ्यासं नित्यम्
वद संस्कृतेन वाक्यम् ।
विश्वासयुतो भूत्वा
साधु व्यवहर योग्यम् ।। 4 ।।

अखिलं निहितं ज्ञानम्
अस्यां बहु-विज्ञानम् ।
शोधेन सिद्धमेतत्
अनुशीलय प्रज्ञानम् ।। 5 ।।

वेदस्य दिव्यभाषा
एषा पुराणभाषा
अधुनापि तथैव वरा
संगणक योग्यभाषा ।। 6 ।।

(इदं गीतं राष्ट्रपतिसम्मानितस्य पण्डितमुरलीधरमिश्रस्य संस्कृतप्रचारक्रमे रचना अस्ति)

# यत्नं विना न रत्नम्

## प्रार्थना

("दयाकर दान भक्ति का हमें परमात्मा देना" इतिलयेन)

दयित्वा मे हि परमात्मन् !
सुदानं देहि विद्यायाः,
दयित्वा आत्मनि प्रगुणा,
विशुद्धिः नाथ मे कार्या ।

मदीयं ध्यानमागच्छ,
प्रभो नेत्रद्वये तिष्ठ,
तमोमय-चित्तमागत्य,
परं ज्योतिः शुभं देयम् । दयित्वा ....

प्रवाह्य प्रेमगङ्गा च
हृदि त्वं स्नेहसिन्धुं च,
परस्परमेक - भावेन,
प्रभो वस्तुं च शिक्षय माम् । दयित्वा ....

स्वधर्मः चास्तु सेवैव,
स्वकर्माप्यस्तु सेवैव,
स्वसत्यं चास्तु सेवैव,
अहं सेवी स कर्त्तव्यः । दयित्वा ....



©BSTBPC NOT TO BE PUBLISHED

देशाय जीवनं पूर्णं,
स्वमरणं चास्तु देशाय,
स्वप्राणान् देशरक्षायै,
प्रदातुं शिक्षय भगवन् । दयित्वा ....

दयित्वा मे हि परमात्मन्
सुदानं देहि विद्यायाः
दयित्वा आत्मनि प्रगुणा,
विशुद्धिः नाथ मे कार्या । दयित्वा ....

©BSTBPC
NOT TO BE PUBLISHED

# यत्नं विना न रत्नम्

कस्यचित् कृषकस्य द्वौ पुत्रौ आस्ताम् । तयोः ज्येष्ठः परमोऽलसः प्रमादी चासीत् । कनिष्ठस्तु विद्याव्रती परिश्रमी चासीत् । सुतद्वयं विद्यालये प्रवेशिकायां प्राविशत् । ज्येष्ठतनयः प्रायः क्रीडानिमग्नो दृष्टः । तस्यैवं विद्यां स्थितिमवलोक्य पित्रोक्तम् – ''वत्स ! एष ते परीक्षाकालः, अतो नैवमाचरणीयम् । पश्य स्वानुजं, यः सततं अध्ययनरतोऽस्ति, अवसरं प्राप्य कृषिकर्मण्यपि योगदानं करोति । त्वं तु गृहकार्यमपि विहाय केवलं क्रीडामग्न इव दृश्यसे । अतः पुत्र ! कुरुवात्मशक्त्या प्रयत्नम् ।''

''तात ! एष ममानुजो मन्दबुद्धिरस्ति । तस्य स्मरणशक्तिरपि न तीक्ष्णाऽस्ति, तेनैव स वारं-वारं प्रश्नोत्तराणि रटति, क्षणादूर्ध्वं च तानि विस्मरति । मया तु तत्सर्वाणि कण्ठस्थीकृतानि ।''

अथ कतिपयदिनान्तरे परीक्षावसरोऽप्यायातः ज्येष्ठेन सुतेन परीक्षाभवने प्रश्नपत्रमालोक्य साहसमपि परित्यक्तम् । उद्धारस्य कमपि मार्गमदृष्ट्वा सोऽनुकरणवृत्तिधारणं कृतवान् । तस्य अनुजस्तु उत्तीर्णोऽभवत् । अथ स ज्येष्ठसुतं खिन्नवदनं वीक्ष्य तस्य पित्रोक्तम् – ''पुत्र ! अवगच्छ तथ्यमिदं यद् यत्नं विना न लभ्यते रत्नं कदापि केनचित् ।''

©BSTBPC
NOT TO BE PUBLISHED

# विदुला-पुत्र-संवादः

विदुला एका अतिसंयमिनी तेजस्विनी च नारी । तस्याः वैदुष्यं राजसभासु विश्रुतमासीत् । एकदा तस्याः सञ्जयो नाम एकलः पुत्रः स्वप्रतिवेशिना राज्ञा सिन्धुराजेन पराजितः रणाच्च पलायितः दैन्यमुपगत आसीत् । मृत्युभीतस्य पुत्रस्य स्थितिं विज्ञाय तस्य दैन्यमपाकर्तुं सा प्रथमं तं भर्त्सयति – 'हे शत्रुनन्दन ! त्वं न मे पुत्रः प्रतिभासि । मानविवर्जितस्य तव क्षत्रियेषु परिगणनं न कदापि भविष्यति । कुतस्तव अङ्गेषु दौर्बल्यम् आगतं, कथं तव बुद्धिः भ्रान्ता जाता, यदेवं नपुंसकायसे । शत्रुभिर्निन्दितस्य, मानविवर्जितस्य तव जीवनं व्यर्थम् । वीरास्तु व्यसनेष्वपि धैर्यं न त्यजन्ति, मृत्युं सम्मुखं दृष्ट्वा अपि स्वस्थानात् न विचलन्ति । यथा वायुः निःशङ्कम् आकाशे चरति तथैव त्वमपि रणभूमौ विचर । पराक्रमं चाभिदर्शया ।

**मुहूर्तं ज्वलनं श्रेयः न च धूमायितं चिरम् ।**

विद्वांसः फलाभिलाषिणो न भवन्ति । न च वैभवमिच्छन्ति केवलं पुरुषकर्म कुर्वन्ति । त्वमपि पुरुषार्थं शौर्यञ्च प्रदर्श्य यशो लभस्व । सत्पुरुषः स एवास्ति यः विद्यया, तपसा, ऐश्वर्येण शौर्येण च सर्वत्र चमत्कृतिं जनयति; हृदयमायसं कृत्वा राज्यं धनञ्च उपार्जयति तथा शत्रुसमक्षं निर्भयं विचरति। येन केन विधिना उदरपोषणं तु सः करोति यो नैव स्त्री न पुनः पुमान् भवति। यः सिंहः सदृशं पराक्रमं प्रदर्श्य शत्रून् विजयते अथवा वीरगतिं प्राप्नोति, तस्य बान्धवाः सुखिनः प्रसन्नाः च तिष्ठन्ति। तस्यैव जीवनं सफलम्। त्वञ्च राजपुत्रः। राजपुत्रः शत्रुञ्जयो भवति। शत्रुञ्जयस्यैव राजपुत्रस्य गाथाः जनाः गायन्ति।

**इन्द्रो वृत्रवधेनैव महेन्द्रः समपद्यत।**

**माहेन्द्रं च गृहं लेभे लोकानां चेश्वरोऽभवत्।**

**अतस्त्वं शत्रूञ्जहि अथवा वीरगतिं प्राप्नुहि।**

एवं मातुः नानाविधैः वाग्बाणप्रहारैः आहतः पुत्रः मातरं प्रोवाच – 'मातः तव हृदयं वज्रसार-निर्मितं तवोपदेशोऽपि तथैव कठिनः। त्वं मां परकीयमिव युद्धाय प्रेरयसि। अहं तव एकलः पुत्रः। मम मरणे त्वम् किं प्राप्स्यसि ?

©BSTBPC NOT TO BE PUBLISHED

पुत्रस्य भावमभिज्ञाय माता पुनः ब्रूते – 'हे पुत्र विज्ञैः पुरुषार्थसाधनायैव कर्माणि क्रियन्ते। एतत् सुविचिन्त्यैव युद्धाय प्रेरितोऽसि। या माता पुत्राय कर्त्तव्यं न बोधयति, कुमार्गगामिनं दृष्ट्वापि तं न प्रतिबोधयति, शुष्कप्रेमवशात् कष्टसाध्येषु कर्मसु न योजयति, सा वस्तुतः कुमाता। क्षत्रियास्तु रणशूराः भवन्ति। ते रणे योद्धुं जयं मृत्युं वा लब्धुं प्रजापतिना सृष्टाः। एतदर्थं त्वत्कृते युद्धकर्म एव श्रेयस्करम्। त्वमस्य राज्यस्य राजा। प्रजाः राज्ञः अनुगामिनः भवन्ति। त्वयि भीते सर्वे भीताः भविष्यन्ति। त्वयि हते राज्यं हतं भविष्यति। अतः हे पुत्र, यदा त्वं सिन्धुराजस्य सर्वान् सैनिकान् संहरिष्यसि तदैवाहं त्वाम् औरसं बोधयिष्यामि। अहं तव बाहुबलेनोपलब्धं यशोधनमेव द्रष्टुकामा। स्वरूपधनं कदापि द्रष्टुं नेच्छामि। पुनश्च पुत्रेण "अर्थहीनः सहायहीनश्चाहं कथं शत्रुभिः सह योत्स्ये" इति प्रश्ने कृते विदुलया कार्ये साफल्याधायकानां शत्रुवशीकरणोपायानां निर्देशः कृतः। तदीयेन निर्देशेन प्राप्तोत्साहेन च सञ्जयः शत्रून् विजितवान् मातरञ्चाभिनन्दितवान्।

**इदमुद्धर्षणं भीमं तेजोवर्धनमुत्तमम्।**
**राजानं श्रावयेन्मंत्री सीदन्तं शत्रुपीडितम्॥**

©BSTBPC
NOT TO BE PUBLISHED

# राष्ट्रियगीतम्

## सम्पूर्णविश्वरत्नम्

(इदं गीतं ''सारे जहां से अच्छा हिन्दोस्तां हमारा'' लयेन गेयम्)

संपूर्णविश्वरत्नं खलु भारतं स्वकीयम् – 2
पुष्पं वयं तु सर्वे, खलुदेशवाटिकीयम् ।। स्वकीयं ...

सर्वोच्चपर्वतो यो, गगनस्य भालचुम्बी
सः सैनिकः सुवीरः प्रहरी च स स्वकीयं ।। स्वकीयं ...

क्रोडे सहस्रधाराः प्रवहन्ति यस्य नद्यः,
उद्यानमासु पोष्यं, भुवि गौरवं स्वकीयम् ।। स्वकीयं ...

धर्मस्य नास्ति शिक्षा कटुता मिथो विधेया,
एके वयं–3 तु देशः, खलु भारतं स्वकीयम् ।। स्वकीयं ...

सम्पूर्णविश्वरत्नं खलु भारतं स्वकीयम् ।।

# 'लोकगीतम्'

('खेतवा जोतेला किसनमा' लयानुसारम्)

क्षेत्रं कर्षति कृषाण: ।
क्षेत्रं कर्षति कृषाण: ।।

प्रात: उत्थाय नित्यं-2
गृहीत्वा च वृषभौ,
क्षेत्रं गच्छति कृषाण:
क्षेत्रं कर्षति कृषाण: ।

अग्रे-अग्रे बलीवर्दौ द्वौ - 2
पृष्ठे कृषीवल,
क्षेत्रं कर्षति कृषाण: ।
क्षेत्रं कर्षति कृषाण: ।।

एक-हस्ते रज्जुं धृत्वा
द्वितीये तु दण्डम्,
वृषभं प्राजति कृषाण:
क्षेत्रं कर्षति कृषाण: ।

स्कन्धे तु बीजपात्रम्
नीत्वा करेण,
बीजम् उप्यते रे तेन
क्षेत्रं कर्षति कृषाणः ।

दिवा मध्ये आगतः सः
पीपलच्छायायाम्,
क्रियते भोजनं रे तेन
क्षेत्रं कर्षति कृषाणः ।

# अमृतं बालभाषितम्

''पापा ! कोऽर्थः पापाशब्दस्य ?'' काचित्पञ्चवर्षीया कन्या स्वपितरमपृच्छत् – ''यो हि पापं करोति स पापा इत्येव मया गृहीतम्।''

''मा मैवं वद गुड्डि !'' तस्याः पितोवाच – ''पापा तु आंग्लभाषायाः पितृसम्बोधनशब्द एवं ज्ञातव्यस्त्वया ।''

''परन्तु भारतीया वयं, तदत्र तत्सम्बोधनपदस्य न कश्चिदभावो वर्तते ।''

''गुड्डि ! सभ्यानां लोकानामेवं सम्बोधनं समीचीनम् ।''

''नाहं गुड्डीति तात ! न मे मातापि मम्मीति । ममी तु संग्रहालये मयाऽवलोकिता । ममाम्बा कथं ममीति कथ्यते ?''

''का वार्ताऽत्र चलिताऽस्ति ? अहमपि श्रोतुमभिलषामि ।'' माता पृच्छति ।

''डार्लिंग ! एषा आवयोः दुहिता 'पापा पापं करोति, मम्मी च संग्रहालयस्य ममीति कथयति । न जाने केन कारणेन भ्रमितोऽस्याश्चित्तक्रमः । प्रतीयते यदस्य चत्वरस्य बालकानां कुप्रभावेण ग्रस्तेयम् ।''

''महोदय ! किन्न विचारयसि यत्क्वचिद् क्वचिदल्पवयस्केनापि कस्यचित् सत्यस्योद्घाटनं क्रियते । अमृतं बालभाषितमिति प्रसिद्धोक्तिरपि ज्ञातव्या । अतोऽद्यप्रभृति अहमम्बा, त्वञ्च पिता, इत्येवं सम्बोधनं भविष्यति । भारतीयां संस्कृतिं प्रति संकेतोऽस्याः सर्वभावेन ग्राह्यः ।

# प्रभातवर्णनम्

सूर्यः पूर्वदिशायामधुना,
विकसति दिव्यः किरणावलिना ।
तस्य समुदये परितः विश्वम्,
लभते नव-नव जीवनतत्त्वम् ॥ 1 ॥

विकसति कमलदलं तु तडागे,
कूजति कोकिलगणः सुरागे ।
चरितुं पशुः वनं प्रति याति
शिशुरपि निद्रातः जागर्ति ॥ 2 ॥

ऋषयो ध्यानरता दृश्यन्ते,
मल्ला इन्द्रयुधि प्रयतन्ते ।
प्राणायाममहो कुर्वन्तः
दृश्यन्ते सम्प्रति ते सन्तः ॥ 3 ॥

खादयति स्ववृषभं कृषकः
हलं कर्षति क्षेत्रे कृषकः ।
सिञ्चति वारिधारया शस्यम्,
रोपयति नवपादपवृन्दम् ॥ 4 ॥

©BSTBPC
NOT TO BE PUBLISHED

घण्टाध्वनि: मन्दिरे जात:,
देव: प्रीतमना सञ्जात: ।
भक्तो वरदानं कामयते
शुभाशिषं तु पूजको दत्ते ।। 5 ।।

छात्र: निजगृहकार्यं कुरुते
माता शिशवे दुग्धं दत्ते ।
वीथ्यां गमनागमने जाते
दृश्यमिदं चित्रं तु प्रभाते ।। 6 ।।

यो जागरणं कुरुते अत्र,
साफल्यं लभते सर्वत्र ।
प्रकृते: नियमं य: पालयति
विघ्नदलं हत्वा सो जयति ।।7।।